## सोऽचि लोपे चेत् पादपूरणम्। (१३४/१७७)

सः [1]इत्येतस्य अचि परतः सुलोपो भवति, लोपे सति चेत् [2]पादः पूर्यते। [3]'सेदु राजा क्षयति चर्षणीनाम्' (ऋ. १.३२.१५)। 'सौषधीरनुरुध्यसे' (ऋ. ८.४३.९)। लोपे चेत् पादपूरणम् इति किम्? स इव व्याघ्रो [4]भवेत्। अचि इति विस्पष्टार्थम्[5]। पादग्रहणेनात्र श्लोकपादस्यापि ग्रहणं केचिदिच्छन्ति, तेनेदं [6]सिद्धं भवति।

सैष दाशरथी रामः सैष राजा युधिष्ठिरः।
सैष कर्णो महात्यागी सैष भीमो महाबलः॥

## सुट् कात् पूर्वः। (१३५/२५५३)

अधिकारोऽयम्[7] 'पारस्करप्रभृतीनां च सञ्ज्ञायाम्' (६.१.१७५/१०७१) इति यावत्। इत उत्तरं यद् वक्ष्यामस्तत्र सुट् इति, कात् पूर्वः इति चैतदधिकृतं वेदितव्यम्। वक्ष्यति – 'सम्पर्युपेभ्यः करोतौ भूषणे' (६.१.१३७/२५५०)। संस्कर्ता। संस्कर्तुम्। [8]संस्कर्तव्यम्। कात् पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थम्। तथा हि संस्क्रृषीष्ट, संस्क्रियते इति संयोगादिलक्षणौ इड्गुणौ (७.२.४३/२५२६) (७.४.२९/२३८०)) न भवतः। 'तिङ्ङतिङः' (८.१.१८/३९३५) इति निघातोऽपि तर्हि न प्राप्नोति, सुटा व्यवहितत्वात्? 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या.प. ३७) इति वचना[9]न्नास्ति व्यवधानम्। संचस्करतुः, संचस्करुः इति गुणः कथम्? 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या. प. २१) इति। संयोगोपधग्रहणं [10]च 'ऋतश्च संयोगादेर्गुणः' (७.४.१०/२३७९) इत्यत्र कर्तव्यम्। टित्करणं सुट्स्तुस्वञ्जाम् (८.३.६५/२२७०) इत्यत्र विशेषणार्थम्॥

## अड्भ्यासव्यवायेऽपि। (१३६/२५३०)

अड्व्यवाये, [11]अभ्यासव्यवाये अपि सुट् कात् पूर्वः भवति। समस्करोत्। समस्कार्षीत्। सञ्चस्कार। [12]परिचस्कार।

किमर्थं [13]पुनरिदमुच्यते, पूर्वं धातुरुपसर्गेण युज्यते [14]इति तत्र धातूपसर्गयोः कार्यमन्तरङ्गम् इति पूर्वं [15]सुट् क्रियते पश्चाद् अडभ्यासौ? अभक्तश्च सुट् इत्युक्तम्, ततः सकारादुत्तरावडभ्यासौ अनिष्टे देशे स्याताम्। एतस्मिंस्तु सत्यत एव वचनात् कृतयोरडभ्यासयोः तद्व्यवाये अपि सुट् कात् पूर्वः क्रियते इति सिद्धमिष्टं [16]भवति॥

## सम्पर्युपेभ्यः करोतौ भूषणे। (१३७/२५५०)

सम् परि उप इत्येतेभ्यः भूषणार्थे करोतौ परतः सुट् कात् पूर्वो भवति। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। [17]अत्र संपुंकानां सत्वम् (८.३.३४/१३८ वा.) इति समो मकारस्य सकारः, पूर्वस्य [18]चाकारस्यानुनासिकः। परिष्कर्ता। परिष्कर्तुम्। परिष्कर्तव्यम्। सुट्स्तुस्वञ्जाम् इति षत्वम्। उपस्कर्ता। उपस्कर्तुम्। उपस्कर्तव्यम्। भूषणे इति किम्? उपकरोति। सम्पूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते, संस्कृतमन्नम् [19]इति॥

---

1. इत्यस्य फ. 2. पादपूरणम् ग. फ. 3. सेन्दू मुद्रितः पाठः। 4. भवति ग. फ. 5. भवति इत्यधिकम् ग.फ. 6. सर्वमपि इत्यधिकम् ग. 7. इति इत्यधिकम् फ. 8. संस्कर्तव्यम् नास्ति ब.क. 9. नास्ति व्यवधानम् नास्ति ब.फ. 10. तु फ. 11. अचि इत्यधिकम् ब.क.ड.फ. 12. संचस्करिथ इत्यधिकम्. परिचस्कार नास्ति फ. 13. पुनर् नास्ति फ. 14. इति नास्ति फ. ह. 15. सुटि कृते ह. 16. भवति नास्ति ह. 17. अत्र नास्ति फ. 18. च नास्ति फ. 19. इति नास्ति क.फ.